International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 254-256
© 2025 IJMH
www.themultijournal.com
Received: 16-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# जैमिनीयन्यायमालायाः तृतीयाध्यायस्य आदिमाधिकरणयोर्वैशिष्ट्यम्

**प्रो. प्रभाकरप्रसादः**

**गोकर्णाख्ये शिवक्षेत्रे धूर्जटेर्नित्यसन्निधौ ।**
**स्थितमाराविघ्नेशं सिद्धिदं प्रणमाम्यहम् ।।**
**प्रमाणभेदबोधेन धर्मरूपे निरुपिते ।**
**लक्षणाभ्यां तृतीयेऽत्र शेषत्वं प्रतिपाद्यते ।।**

'शास्त्रे पूर्वोत्तरीभावोऽध्यायानामभिधास्यते'[1] इत्यादौ प्रतिज्ञातत्वात्पूर्वं द्वितीयतृतीयाध्याययोः सङ्गतिः प्रदर्श्यते- द्वितीय इत्यादिना ।

अयमाशयः- 'अथातो धर्मजिज्ञासा'[2] इत्यादरभ्य 'अर्थाद्वा कल्पनैकदेशत्वात्'[3] इत्येवमन्तैः सूत्रैः चतुर्भिः पादैः प्रथमाध्याये जिज्ञास्ये धर्मे विध्यर्थवादमन्त्राः, स्मृतिः, शिष्टचारः, नाम, वाक्यशेषः, पदार्थसामर्थ्यमित्यष्टौ प्रमाणानीति न्यायपूर्वकं प्रतिपादितम्। एव प्रथमेनाध्यायेनोक्तेषु धर्मप्रमाणेषु 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते'(1) इत्यारभ्य 'अपि वा क्रमसंयोगात् विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत'(2) इत्यन्तं चतुर्भिः पादैः द्वितीयेनाध्यायेन प्रमेयभूतं धर्मस्वरूपं निरुपितम् । यद्यपि प्रथमाध्याय एव धर्मप्रमाणेषूक्तेषु अर्थादेतावत्प्रमाणप्रतिपाद्यो धर्म इति सामान्यतो धर्मस्वरूपं निरुपितञ्ज्ञातमेव तथापि तत्र कात्र्स्न्येन धर्मस्वरूपस्यानिरुपणात् तद्गतानेकत्वरूपभेद-प्रतिपादनेन विशेषतः धर्मस्वरूपनिरुपणार्थं द्वितीयोऽध्यायः प्रवृत्तः।

एवञ्च प्रथमद्वितीयाध्यायाभ्यां सप्रमाणं धर्मस्वरूपमवगतमिति अतः परस्य ग्रन्थस्य किमुत्थानमिति जिज्ञासायां भगवता जैमिनिना 'अथातश्शेषलक्षणम्' इति प्रतिज्ञापूर्वकं तृतीयाध्याय आरभ्यते। ब्रह्मज्ञानवद् धर्मज्ञानमेव न कस्मैचित् फलाय कल्पते अपि तु ज्ञातो धर्मः अनुष्ठितः स्वर्गाद्यभ्युदयाय कल्पते। अनुष्ठानञ्च साधनफलादिज्ञानमपेक्षते। अतः 'अथातो धर्मजिज्ञासे'त्यादिमे सूत्रे स्वरूपप्रमाणसाधनफलैः धर्मो जिज्ञास्य इति भाष्यादौ प्रतिपादितम् । अतः कश्च प्रधानधर्मः अर्थात् किं प्रधानं कर्म किञ्चाङ्गकर्म इत्यादिविवेचनार्थमग्रिमग्रन्थस्य समुत्थानमिति शेषलक्षणमारभ्यत इति प्रतिज्ञया शेषलक्षणमारभ्यते । अत्र 'अथातः शेषलक्षणम्' इति सूत्रे 'अथ'शब्दः अधिकारार्थः। शेषलक्षणमारम्भणीयमिति प्रारब्धव्यस्य लक्षणपदगृहीतस्याध्यायस्योपात्तत्वात् । 'अथातो धर्मजिज्ञासा' इति शास्त्रारम्भसूत्रे तु जिज्ञासापदस्योपात्तत्वात्, जिज्ञासायाश्च पुरुषतन्त्र-त्वाभावादारब्धत्यत्वं न सङ्गच्छत इति 'अथ'शब्दस्यानन्तर्यमेवेत्यर्थः स्वीकृतः, इह त्वधिकारार्थत्वे बाधाभावादधिकारार्थत्वं स्वीक्रियत इति विवेकः । 'अतः'शब्दो हेत्वर्थः, तेन द्वितीयाध्यायेन सह सङ्गतिः सिद्ध्यति । कर्मणां भेदे सिद्धि एवाङ्गाङ्गिभावः सिद्ध्यति, अतः कर्मभेदः निरुपणस्य शेषत्वनिरुपणं प्रति हेतुत्वमतः कर्मभेदनिरुपणानन्तरं शेषलक्षणमारभ्यत इति सूत्रार्थः सङ्गच्छते । एतदेवाचार्यैः 'द्वितीये कर्मणां भेदे' इत्यादिना प्रतिपाद्यते । अतः द्वितीयतृतीयाध्याययोः हेतुहेतुमद्भावसङ्गतिः ।

अथवा एवं वक्तुं शक्यते – 'चोदनालक्षणोऽर्थो धर्मः' इति धर्मे विधेः प्रामाण्यमुक्तम् । विधिश्च चतुर्विधः- उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिरधिकारविधिश्चेति। तत्र प्रथमद्वितीयाभ्यामुत्पत्तिविधिर-गोचरो विषयो निर्णीतः। तृतीये विनियोगविधिगोचरो विषयो विविच्यत इति । यतः अत्र तृतीयाध्याये क्व शेषिणि कः शेषः कतमेन प्रमाणेन कतमत्प्रमाणान्तरं बाधित्वा विना बाधेन वा विनियुज्यते इति

विनियोगप्रकारः, विनियोगजकश्रुत्यादिषट्कस्वरूपं तेषां बलाबल-विवेचनञ्च सर्वं विनियोगविधिसम्बद्धं विषयजातं विविच्यते।

एवं द्वितीयतृतीयाध्याययोः सङ्गतिनिरुपणानन्तरं प्रथमाधिकरणं निरूप्यते-

**जैमिनीयन्यायमाला**

**अशाब्दी शेषता शाब्दी वा न शाब्द्यप्रतीतितः।**
**क्रियाकारकसंसर्गमात्रे व्युत्पत्तिसम्भवात् ॥2॥**
**गुणप्रधानभावेन संसर्गेन्तर्भवत्यसौ।**
**व्युत्पत्तिसम्भवात्तत्र शाब्दता स्यात्क्रियादिवत् ॥3॥**

**न्यायमालाप्रकाशिका**

'अथातः शेषलक्षणम्' इति सूत्रस्य वार्त्तिककारैः द्वेधा व्याख्यानं कृतम्। आदौ-

**द्विलक्षण्याः परं शिष्टं यावत्किञ्चन लक्षणम्।**
**तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम् ॥** इति(1)।

प्रमाणभेदाध्यायाभ्यां सप्रमाणं धर्मस्वरूपे निश्चिते समग्र उत्तरग्रन्थः कानि धर्मस्य साधनानि कानि च साधनाभासान्यनङ्गानि? क्व पुरुषः प्रधानं धर्मस्य क्व वा पुरुषो गुणभूत इत्यादिविचाराणां विवेचनपर आरम्भणीय इति प्रतिज्ञासूत्रस्मय तात्पर्यमिति व्याख्यातम्। तदनु-

**यत्तु शेषः परार्थत्वादित्यनन्तरलक्षणम्।**
**तदङ्गत्वस्य वाच्यत्वादादौ तन्मात्रगोचरम् ॥**
**अङ्गलक्षणमेवेदमिहोक्तं शेषलक्षणम्।**
**तद्विशेषप्रपञ्चत्वात्तत्रान्यान्तर्गतिस्थितेः ॥** इति(2)।

शेषलक्षमेवार्थात् तृतीयाध्यायस्य विषयजातमेवारम्भणीयमिति प्रतिज्ञासूत्रेणानेन प्रतिज्ञातमिति वर्णितम्। अत्राचार्यैः वार्त्तिक-काराणां द्वितीयप्रकारमाश्रित्य तृतीयाध्याय आरम्भणीय इत्यर्थ-परतमेदमधिकरणं निरुप्यते। तदर्थं तृतीयाध्यायस्य विषयभूतं शेषत्वं शाब्दं न वेति चिन्त्यते। तद्यदि शाब्दं तर्हि आरम्भणीयमन्यथा नारम्भणीयमिति विवेकः। तत्र पूर्वपक्ष एवमुपस्थाप्यते- प्रथमपादे सप्तमेऽधिकरणे तद्भूताधिकरणे पदाभिहितेभ्यः पदार्थेभ्यः सन्निधानादिसहकारिवशात्पदार्थानाम- न्योन्यान्वयप्रतिपत्तिर्लक्षणया सिद्ध्यतीति निर्णीतम्। अतः 'व्रीहीन् प्रोक्षती'त्यादिवाक्येभ्यः व्रीह्यादिपदार्थानामुपस्थापनपूर्वकं व्रीहि-प्रोक्षणादिकार्याण्येव विधीयन्त ति तेषामेव शाब्दत्वम्, प्रोक्षणं प्रति व्रीहीणां शेषत्वन्तु केनापि शब्देन नोपस्थाप्यते। अतः शेषत्वं न शाब्दम्। अत एवाचोदनालक्षणत्वेन धर्मत्वाभावात् शास्त्रे व्युत्पाद्यत्वं शेषत्वस्य नास्तीति तदर्थं नारम्भणीयोऽयमध्याय इति।

एवं पूर्वपक्षे प्राप्ते समाधिरभिधीयते- शेषत्वं शाब्दमेव, यतः पदार्थमात्रं न वाक्यार्थ अपि तु पदार्थयोः पदार्थानां वा संसर्गः वाक्यार्थः स च पदाभिहितपदार्थैर्लक्षणया प्रतिपद्यत इति तद्भूताधिकरणे निर्णीतम्। एवञ्च क्रियाकारकान्वयाः शाब्दा इत्युक्तं भवति। अन्वयश्च गुणप्रधानभावमन्तरेण न सम्भवति। द्वयोः प्रधानयोः द्वयोर्गुणयोर्वा परस्पराकाङ्क्षारहितत्वेनान्वययोग्यताया अभावादन्वयो भवितुं नार्हति। अतः अन्वयार्थं गुणप्रधानभावः शेषशेषिभावाभिधोऽपेक्षितः। तेन च शेषशेषिभावस्य अन्वयेऽन्तर्भू-तत्वातन्निरुपणमपि शाब्दमेवेति शेषत्वस्य चोदनालक्षणत्वातत्त-दर्थमारम्भणीयोऽयमध्याय इति युज्यते।

इदानीं द्वितीयाधिकरणं विविच्यते –

**जैमिनीयन्यायमाला**

**स्वरूपहेतू न स्तोऽत्र स्तो वा नैवानिरुपणात्।**
**पारार्थ्यं शेषताहेतू रूपं तेनोपलक्षितम् ॥3॥**

अत्र- शेषते, स्वरूपहेतू- स्वरूपं हेतुश्चेति स्वरूपहेतु अत्र हेतुपदेन प्रमाणमुच्यते, तेन शेषत्वे प्रमाणं नास्त्युत अस्ति, शेषत्वस्य स्वरूपं नास्त्यस्ति वेति द्वेधा सन्देहे अनिरुपणात्- निरुपणस्यासम्भवात् शेषत्वस्य स्वरूपं प्रमाणं वेति द्वयमपि नास्तीति पूर्वपक्षे प्राप्ते पारार्थ्यं शेषताहेतुः- पारार्थ्यं शेषत्वे प्रमाणम्, रूपं तेनोपलक्षितम्-स्वरूपं पारार्थ्योपलक्षित आकारः इति शेषत्वस्य स्वरूपं प्रमाणञ्च स्त इति सिद्धान्तः।

**अयमाशयः–** शेषत्वं शाब्दमिति पूर्वाधिकरणे निरुपितम्। इदानीं लक्षणप्रमाणाभ्यां वस्तुसिद्धिर्भवतीति शेषत्वस्य किं लक्षणम्? किञ्च तत्र प्रमाणमिति निरुप्यते। एतदर्थं 'शेषः परार्थत्वात्'[4] इति सूत्रं प्रवृत्तम्। अत्र साक्षात् परार्थत्वं शेषत्वे हेतुरित्युच्यते, तेन चार्थात् यः परार्थः स शेष इति शेषत्वस्य स्वरूपमिति कथितं भवति। स्वरूपञ्च वस्तुपरिचायकं लक्षणमेव भवति, यथा सास्नादिमत्वं गोर्लक्षणमित्युक्ते गोरसाधारणस्वरूपमवगम्यते। अत आचार्यैः अधिकरणशरीरे स्वरूपहेतू न स्तः रत्तो वेति सन्देहः प्रदर्शितः। 'शेषः परार्थत्वाद्' इति सूत्रे परार्थत्वस्य साक्षात् हेतत्वकथनात् 'पारार्थं शेषताहेतुः' इति सिद्धान्ते आदौ शेषत्वे पारार्थ्यं हेतुरिति प्रमाणं प्रदर्शितम्। पर्वतो वह्निमान् धूमाद् इत्यत्र धूमात् पर्वते वह्निसत्ता बोध्यते इति दर्शनाद्धेतुः प्रमाणपर एव भवति।

तदेवं शेषत्वस्य लक्षणप्रमाणयोर्नास्तित्वास्तित्वविषयकसन्देहे नास्तीति पूर्वपक्ष उपस्थाप्यते – शेषेण विना शेषी न भवति यथा तोयादिभिर्विनाङ्कुरो नोत्पद्यते इति नियमदर्शनाद् <u>**अविनाभूतत्वं शेषत्वम्**</u> इत्युच्यते चेद् आग्नेयाग्नीषोमोयादिषड्याग्गानामविना-भूतानां परस्परशेषत्वं प्रसज्यते इत्यतिप्रसक्तिः। अङ्गानुष्ठान-मङ्ग्यर्थमेव क्रियते यथा भवननिर्माणार्थं तदपेक्षितसामग्रीणां सङ्कलनं क्रियत इति लोकसिद्धत्वात् <u>**प्रयोज्यत्वं शेषत्व**</u>मित्युच्यते चेत् 'पुरोडाशकपालेन तुषानुयवपति' इति विधेः तुषोपवापं प्रति कपालस्य शेषत्वं विहितं विरुद्ध्येत। लोक आदौ इदं कर्तव्यमिति किञ्चिदुक्त्वा तदनन्तरं तत्कथं कार्यमिति यद् वर्ण्यते तदादौ उक्तस्य शेष इति ज्ञायते, अतः एतदनुसृत्य विध्यादिविहितं प्रधानम्, विध्यन्तविहितत्वञ्च शेषत्वमिति लक्षणमुच्यते चेत् पलाश-शाखाच्छेदस्य विध्यादिविहितत्वाद् दर्शपूर्णमासकर्मणः शेषत्वं न स्यात्। अतः शेषत्वस्य स्वरूपं किमपि इदमित्थमिति वक्तुं न शक्यते।

शेषत्वस्य स्वरूपस्य अपरिचयादेव अयं शेष्योऽस्य, एवंत्वात् इति शेषत्वस्य हेतुरपि क इति निश्चयेन वक्तुं न शक्यते । तदेवं शेषत्वस्य स्वरूपं हेतुर्वा नास्तीति पूर्वपक्षे प्राप्ते सिद्धान्त उच्यते –

पारार्थ्यमेव शेषत्वस्य हेतुर्भवति। यथा विमतः प्रयाजादिः शेषः परार्थत्वादिति शेषत्वे हेतुः निरुपयितुं शक्यते। तेन पारार्थ्यं शेष इति शेषलक्षणं सङ्गच्छते। पारार्थ्यञ्च परोद्देशप्रवृत्तव्यापारविषयत्वम्। प्रधानस्याङ्गोद्देश्यकप्रवृत्त्यगोचरत्वात् प्रधानस्याङ्गशेषत्वं नास्तीति नातिव्याप्तिः। कर्तुरपि यागाद्युद्देशप्रवृत्तसञ्जीभावादि-व्यापारविषयत्वात् शेषत्वमस्तीति नाव्याप्तिः। एवं फलस्यापि पुरुषेण स्वोपभोग्यतया विषयत्वात् पुरुषशेषत्वं सङ्गच्छत इति नाव्याप्तिः । देशकालयोरपि व्यापारान्तरभावेऽपि प्रधानक्रियायास्तत्र काले देशे चानुष्ठानात्तमादाय लक्षणस्यान्वयः कर्तुं शक्यत इति शेषलक्षणं द्रव्यगुणसंस्कारेषु कर्मणि पुरुषे फले च सङ्गच्छते। अत्र जैमिनिमतेन द्रव्यगुणकर्मफलादिसाधारणं शेषत्वं 'शेषः परार्थत्वाद्' इति सूत्रेणोच्यते । अत्र सूत्रे परार्थत्वात् शेष इति कथनेन साक्षात् शेषत्वस्य हेतुत्वेन पारार्थ्यमुक्तम्। यदा हि परार्थत्वं शेषशब्दप्रवृत्तौ हेतुत्वमुक्तं तदा परार्थ एव शेष इति स्वरूपमप्यर्थत उक्तं भवति। लक्षणञ्च परिचायकं स्वरूपमेव भवति । अत एव असाधारणधर्मो लक्षणमिति लक्षणलक्षणं सङ्गच्छते। स्वरूपस्यैव लक्षणत्वात् 'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्' इत्यभियुक्तोक्तं सङ्गच्छते। तटस्थलक्षणेनापि स्वेतरव्यावर्तकं स्वरूपमुच्यत एवेति तटस्थलक्षणमपि स्वरूपमेव भवति। अयं विशेषः- यावल्लक्ष्य-कालानवस्थितत्वे सति व्यावर्तकं तटस्थलक्षणम्, यथा गन्धवत्त्वं पृथिव्या लक्षणमिति तार्किकाणां पृथिव्या लक्षणं तटस्थलक्षणमेव, यतः आरम्भवादिभिः उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति स्वीकाराद् यावल्लक्ष्यकालानवस्थितत्वे सति स्वेतरव्यवार्तकत्वात्, परन्तु स्वेतरव्यावर्तकं स्वरूपं लक्षणेनानेन बोध्यत एवेति इदं पृथिव्या स्वरूपं बोधयत्येव। स्वरूपमेव लक्षणं स्वरूपलक्षणं भवति, यथा पृथिवीत्वं पृथिव्याः स्वरूपलक्षणं स्वीक्रियते। पृथिवीत्वेन विना पृथिवी नास्त्येवेति पृथिवीत्वस्य पृथिव्याः व्यावर्तकस्वरूपत्वात्, स्वरूपलक्षणमिदं स्वरूपं बोधयत्येव । तदेवं लक्षणं स्वरूपमेव भवति। प्रकृते प्रयाजादीनां शेषत्वे परार्थत्वं हेतुरिति यत्र यत्र परार्थत्वं तत्र तत्र शेषत्वमिति व्याप्त्या निश्चीयते ।

तेन लक्षितः आकारः स्वरूपमिति पारार्थ्यं शेषस्य स्वरूपमिति सिद्ध्यति। न च परार्थत्वं हेतुः, स्वरूपञ्चेति साङ्कर्यमिति वाच्यम्, आकारभेदेनैकस्यैव हेतुत्वं स्वरूपतञ्च युज्येते। दृष्टानेन गृहीतव्याप्तिं सहामीकृत्य बोधक आकारो हेतुः। इतरव्यावृत्त्या बोधक आकारो लक्षणम्। यद्यपि सर्वेऽपि हेतवः साध्यस्वरूपपरिचायका इति न स्वीक्रियते तथापि सर्वाणि लक्षणानि स्वलक्ष्यरस्य स्वेतरव्यावर्तकानुमाने हेत्वात्मकानि भवन्त्येव, यथा पृथिवी स्वेतरभिन्ना पृथिवीत्वात् यत्रैव तत्रैव यथा जलम्, पृथिव्याः स्वेतरव्यावर्तकानुमाने हेतुभूतं पृथिवीत्वं पृथिव्याः स्वरूपलक्षण-मुच्यते । तदेवं शेषस्य लक्षणं प्रमाणञ्च स्त इति लक्षणप्रमाणाभ्यां शेषत्वं सिद्ध्यति ।